असाध्यं सहजं ज्ञेयं मर्म्मच्छेदोद्भवश्च यत् ।
असाध्यानां विशिष्टानां कार्य्यो वाजिकरो विधिः ॥

तस्य चिकित्सा यथा, वैद्यके ।
"सुवर्णासुवर्चलाशुभाधेनुधन्या-
घृतं योगयोगे प्रशस्तं सप्रस्थम् ।
स्वदौ वा दशाम्लौ पचेत् पाकसूर-
स्तदा तेजपत्रं हरिद्रासुपिष्टम् ॥
विधौ शुद्धिहेतौ समुस्तं सुपिष्टं
विधेयं सुगन्धाय दृष्टोपदेशात् ।
समूलाश्वगन्धाम्लप्रस्थं विचूर्ण्यं
शुभं वारि दत्त्वा गुणं वेदयुक्तम् ॥
यदा शेषभूतं तदा योगयोगे
पचेत् पाकविज्ञो भृशं दर्व्विचालात् ।
पचेन्नाविदग्धं घृतस्यापि तुल्यं
विदारीं सप्रस्थां तथा तेन वैद्यः ॥
तथा शाल्मलीतोयदत्तं सप्रस्थं
वितार्थ्यावतिष्ठेद्घृतं योगराजः ॥"

ध्वजवान्, [त्] त्रि, (ध्वजोऽस्यास्तीति । ध्वज+मतुप् । मस्य वः ।) केतनयुक्तः । ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुसञ्चरेत् । यथा,—
"शिरःकपाली ध्वजवान् भिक्षार्थी कर्म्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥
ध्वजवान् कृत्वा शवशिरोध्वजमिति मनुस्मरणात् अन्यच्छिरःकपालन्दण्डाग्रसमारोपितध्वजशब्दवाच्यं गृह्णीयात् ॥" इति मिताक्षरा ॥ (ध्वजः शौण्डिकविपणिपताका विद्यतेऽस्येति । शौण्डिकः । यथा, मनुः । ४ । ८४ ।
"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥")

ध्वजिनी, स्त्री, (ध्वजोऽस्त्यस्याः । ध्वज+इनिः । ङीप ।) सेना । इत्यमरः । २ । ८ । ७८ ॥ (यथा, रघुः । ७ । ४० ।
"मत्स्यध्वजा वायुवशाद्विदीर्णै-
र्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नवोदकानि ॥")

ध्वजी, [न्] पुं, (ध्वजोऽस्त्यस्येति । ध्वज+"अत इनिठनौ ।" ५।२।११५। । इति इनिः ।) ब्राह्मणः । पर्व्वतः । रथः । सर्पः । घोटकः । इति मेदिनी । ने, ७७ ॥ मयूरः । इति राजनिर्घण्टः ॥ शौण्डिकः । इति हेमचन्द्रः ॥ (यथा, याज्ञवल्क्ये ।१।१४१ ।
"प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ॥"
ध्वजविशिष्टे, त्रि । यथा, महाभारते । १ । २२६ । २८ ।
"कृताश्वौ शस्त्रसम्पन्नौ रथिनौ ध्वजिनावपि ॥"
चिह्नयुक्ते च । यथा, मनुः । ११ । ९३ ।
"सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ॥")

ध्वजोत्थानं, क्ली, (ध्वजस्य इन्द्रध्वजस्य उत्थानम् ।) शक्रोत्सवः । इति त्रिकाण्डशेषः ॥ एतत् भाद्रशुक्लद्वादश्यां भवति । इति स्मृतिः ॥

ध्वण, ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) वकारयुक्तः । ध्वणति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, तृ क शब्दे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां परं-अकं-सेट् ।) ह्रस्वोपधः । भाषवचादीनां प्रयोगादन्यत्र शब्दे ध्वनावित्यादि यत्र श्रूयते प्रायेण तत्राव्यक्तशब्दे इति बोध्यम् । ध्वनयति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, मि रवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) वकारयुक्तः । मि, ध्वनयति ध्वानयति मृदङ्गः । इति दुर्गादासः ॥

ध्वनः, पुं, (ध्वन ध्वाने+भावे बाहुलकात् अप् ।) शब्दः । इति भरतद्विरूपकोषः ॥

ध्वनमोदी, [न्] पुं, (ध्वनेन शब्देन मोदयतीति । मुद+णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥

ध्वनिः, पुं, (ध्वननमिति । ध्वन+"खनिकष्यज्यसीति ।" उणां ४ । १३९ । इति इः ।) शब्दः । इत्यमरः । १ । ७ । २२ ॥ मृदङ्गादिशब्दः । यथा,—
"शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवध्वनिः ।
कण्ठसंयोगजन्मानो वर्णास्ते कादयो मताः ॥"
इति भाषापरिच्छेदः ॥
(ध्वन्यतेऽस्मिन्निति । ध्वन+अधिकरणे इः ।) उत्तमकाव्यम् । यथा,—
"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥"
इति काव्यप्रकाशः ॥
(यथाच साहित्यदर्पणे । ४ । २—३ ।
"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ।
वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् ॥
भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥
तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अतएवात्र वाच्यं विवक्षितम् । अन्यपरं व्यङ्ग्यनिष्ठम् । अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्द्देशः ॥"
अस्य बहवो भेदाः सन्ति । ते तु तत्रैव चतुर्थपरिच्छेदे विस्तरशो द्रष्टव्याः ॥)

ध्वनिग्रहः, पुं, (ग्रह+भावे अप् । ध्वनेः शब्दस्य ग्रहो ग्रहणं यस्मात् ।) श्रोत्रम् । इति त्रिकाण्डशेषः ॥ शब्दग्रहश्च ॥

ध्वनितः, त्रि, (ध्वन्यते स्मेति । ध्वन+क्तः ।) शब्दितः । कृतस्वनमृदङ्गादिः । इति भरतः ॥ तत्पर्य्यायः । स्वनितः २ । इत्यमरः । ३ । १ । ९८ ॥ (यथा राजतरङ्गिण्याम् । २ । ८९ ।
"समीरणसमाकीर्णसुषिरस्थाणुनिर्गतैः ।
ध्वनितैरनुशोचन्तमिवावस्थां तथाविधाम् ॥")
ध्वनिकाव्ययुक्तवाक्यादिश्च ॥

ध्वनिनाला, स्त्री, (ध्वन्युत्पादकं नालं यस्याः ।) वीणा । वेणुः । काहलः । इति मेदिनी । ले, १५५ ॥

ध्वनिविकारः, पुं, (ध्वनेर्विकारः ।) काकुः । शोकभयादिना शब्दविकृतिः । इति हेमचन्द्रः । ६ । ४६ ॥

ध्वन्स, उ ऌ ङ गतौ । भ्रंशे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-गतौ सकं-भ्रंशे अकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, ध्वंसित्वा ध्वस्त्वा । ऌ, अध्वसत् । ङ, ध्वंसते । भ्रंशः अधःपतनम् । इति दुर्गादासः ॥

ध्वस्तं, त्रि, (ध्वस्यते स्मेति । ध्वन्स भ्रंशे+क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥ (यथा, भागवते । ७ । २ । ३० ।
"प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ॥")
नष्टम् । (यथा, पञ्चदश्याम् । ७ । १४१ ।
"क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ।
मिष्टान्नध्वस्ततृड्जानन्नामूढस्तज्जिघत्सति ॥")

ध्वा(ध्मा)क्ष, इ काङ्क्षे । घोररुते । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं-च सेट् ।) घोररुतमिह तिरश्चामेव घोरशब्दः । इ, ध्वा(ध्मा)ङ्क्षति काकः । नमध्यपाठेनैव सिद्धे अस्येदनुबन्धो वेदे-सूत्रारम्भेऽर्थः । इति दुर्गादासः ॥

ध्वा(ध्मा)ङ्क्षः, पुं, (ध्वा(ध्मा)ङ्क्षति उच्चैः रौतीति । ध्वा(ध्मा)क्षि घोररुते+अच् ।) काकः । (यथा, मृच्छकटिके ९ अङ्के ।
"शुष्कवृक्षस्थितो ध्वा(ध्मा)ङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥")
मत्स्यभक्षकपक्षी । इत्यमरः । ३ । ३ । २१८ ॥ तक्षकः । भिक्षुकः । इति मेदिनी । षे, १६ ॥

ध्वाङ्क्षजङ्घा, स्त्री, (ध्वाङ्क्षस्य जङ्घेव आकृतिर्यस्याः ।) काकजङ्घा । इति राजनिर्घण्टः ॥

ध्वाङ्क्षजम्बूः, स्त्री, (ध्वाङ्क्षः काकस्तद्वत् कृष्णवर्णा जम्बूः । यद्वा, ध्वाङ्क्षप्रिया जम्बूः ।) काकजम्बूः । इति राजनिर्घण्टः ॥

ध्वाङ्क्षतुण्डी, स्त्री, (ध्वाङ्क्षस्य तुण्डमिवाकृतिः फलेऽस्त्यस्याः । ध्वाङ्क्षतुण्ड+अच् । ततो ङीष् ।) काकनासालता । इति राजनिर्घण्टः ॥

ध्वाङ्क्षदन्ती, स्त्री, (ध्वाङ्क्षस्य दन्त इवाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनखी, स्त्री, (ध्वाङ्क्षस्य नखमिवाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनाम्नी, स्त्री, (ध्वाङ्क्षस्य नाम नाम यस्याः ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनाशिनी, स्त्री, (ध्वाङ्क्षं नाशयतीति । नश+णिनि । ङीप् ।) हपुषा । इति भावप्रकाशः ॥

ध्वाङ्क्षनासा, स्त्री, (ध्वाङ्क्षस्य नासा इव फलमस्याः ।) काकनासालता । इति राजनिर्घण्टः ॥